नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **24**

No. of Printed Pages – **3**

# VU-55-Samanya Dar.

## सामान्य दर्शनम्

**वरिष्ठ उपाध्याय परीक्षा, 2020**

**समय : 3¼ घण्टे**

**पूर्णांक : 80**

परीक्षार्थिभ्यः सामान्यनिर्देशाः

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया ।

(5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

(पातञ्जलयोगदर्शने प्रश्नाः)

1. पातञ्जलयोगसूत्रग्रन्थस्य भोजवृत्तेः टीकाकारः कः ? **1**

2. पातञ्जलयोगसूत्रस्य प्रथमं सूत्रं लिखत । **1**

3. योगसूत्रे कति प्रमाणानि ? नामानि लिखत । **1**

4. योगसूत्रानुसारम् आसनस्य सामान्यलक्षणविधायकं सूत्रं लिखत । **1**

5. समाधिजाः सिद्धयः कति ? नामानि लिखत । **1**

6. भोजवृत्यनुसारं कति दुःखानि ? नामानि लिखत । **2**

7. वृत्तयः कतिधा ? सलक्षणं नामानि लिखत । **2**

8. योगसूत्रानुसारं कः क्रियायोगः ? समासेन प्रकटयत । **2**

9. साधनपादस्य मंगलाचरणं लिखत । **2**

10. अस्तेय प्रतिष्ठायां सर्व रत्नोपस्थानम्-सूत्रस्य भोजवृत्तिं लिखत । **2**

11. "योगश्चित्तवृत्ति निरोधः" सूत्रस्य भोजवृत्यानुसारं व्याख्यानं कुरुत । **5**

12. भोजवृत्यानुसारं प्रमाणानि विशदयत । **5**

13. सम्प्रज्ञातस्वरूपं सभेदं प्रदर्शयत । **5**

14. भोजवृत्यानुसारम् ईश्वरस्य स्वरूपं सभेदं प्रतिपादयत । **8**

**अथवा**

विवेकख्यातिरुत्पत्तेः कारणानि सस्वरूपं लिखत ।

15. योगाङ्गानि सस्वरूपं सभेदं प्रदर्शयत । **7**

**अथवा**

स्वसंविदितं चित्तं सर्वानुग्रहणसामर्थ्येन सकलव्यवहारनिर्वाहक्षमं कथं भवति इति भावं रक्षन् दृष्टृ-दृश्योपरक्तं चित्तं सर्वार्थम्" इति सूत्रं भोजवृत्यानुसारं विशदयत ।

(विवेकचूड़ामणेः प्रश्नाः)

16. ग्रन्थकर्तृमंगलाचरणं लिखत । **1**

17. "गोविन्द" शब्दस्य व्युत्पत्तिं प्रदर्शयत । **1**

18. "कैवल्यमश्नुते"–कैवल्यं पदस्य कोऽर्थः ? **1**

19. भवमोक्षस्य कारणम्–पदस्य कोऽर्थः ? **1**

20. योगरूढ़त्वम्–पदस्य कोऽर्थः ? **1**

21. एषु श्लोकेषु त्रयः श्लोकानां स्वपाठ्यग्रन्थानुसारं व्याख्या विधेया : **(5 × 3 = 15)**

(क) सत्यं ज्ञानमनन्तं ब्रह्म, विशुद्धं परं स्वतः सिद्धम् ।
नित्यानन्दैकरसं प्रत्यगभिन्नं निरन्तरं जयति ।।

(ख) एषोऽन्तरात्मा पुरुषः पुराणो
निरन्तराखण्ड–सुखानुभूतिः ।।
सदैकरूपः प्रतिबोधमात्रो –
येनेषिता वागसवश्चरन्ति ।।

(ग) वीणाया रूपसौन्दर्यं तन्त्रीवादनसौष्ठवम् ।
प्रजारञ्जनमात्रे तत्र साम्राज्याय कल्पते ।।

(घ) मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी ।।
स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते ।।

(ङ) विशुद्धसत्वस्य गुणा प्रसादः, स्वात्मानुभूतिः परमा प्रशान्तिः ।।
तृप्तिः प्रहर्षः परमात्मनिष्ठया सदानन्दरसं समृच्छति ।।

(च) विशोकः आनन्दधनो विपश्चित्, स्वयं कुतश्चित्र बिभेति कश्चित् ।।
नान्योऽस्ति पन्थाभवबन्धमुक्ते–र्विना स्वतत्वावगमं मुमुक्षोः ।।

22. संसारप्रपञ्चस्य मिथ्यात्वं विवेकचूडामणेरनुसारं लिखत । **5**

23. प्रारब्धकर्मणःनिवृत्तिज्ञानात् भवति न वा स्पष्टयत । **5**

24. विवेकचूडामणिग्रन्थानुसारं अद्वैतब्रह्मस्वरूपं प्रतिपादयत । **5**

---

DO NOT WRITE ANYTHING HERE